# Bhishmakritam Vishnu Stotram

# ભીષ્મકૃતં વિષ્ણુસ્તોત્રમ્

## Document Information

Text title : Bhishmakritam Vishnu Stotram

File name : bhIShmakRRitaMviShNustotram.itx

Category : vishhnu, vishnu, mahAbhArata, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : mahAbhArata | bhIShmaparva | adhyAya 63/2-20||

Latest update : November 2, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

November 2, 2025

*sanskritdocuments.org*

# ભીષ્મકૃતં વિષ્ણુસ્તોત્રમ્

ભીષ્મ ઉવાચ ।
વાસુદેવો મહદ્ભૂતં સમ્ભૂતં સહ દૈવતૈઃ ।
ન પરં પુણ્ડરીકાક્ષાદ્દૃશ્યતે ભરતર્ષભ ।
માર્કણ્ડેયશ્ચ ગોવિન્દં કથયત્યદ્ભુતં મહત્ ॥ ૨॥

સર્વભૂતાનિ ભૂતાત્મા મહાત્મા પુરુષોત્તમઃ ।
આપો વાયુશ્ચ તેજશ્ચ ત્રયમેતદકલ્પયત્ ॥ ૩॥

સ સૃષ્ટ્વા પૃથિવીં દેવઃ સર્વલોકેશ્વરઃ પ્રભુઃ ।
અપ્સુ વૈ શયનં ચક્રે મહાત્મા પુરુષોત્તમઃ ।
સર્વતોયમયો દેવો યોગાત્સુષ્વાપ તત્ર હ ॥ ૪॥

મુખતઃ સોઽગ્નિમસૃજત્પ્રાણાદ્વાયુમથાપિ ચ ।
સરસ્વતીં ચ વેદાંશ્ચ મનસઃ સસૃજેઽચ્યુતઃ ॥ ૫॥

એષ લોકાન્સસર્જાદૌ દેવાંશ્ચર્ષિગણૈઃ સહ ।
નિધનં ચૈવ મૃત્યું ચ પ્રજાનાં પ્રભવોઽવ્યયઃ ॥ ૬॥

એષ ધર્મશ્ચ ધર્મજ્ઞો વરદઃ સર્વકામદઃ ।
એષ કર્તા ચ કાર્યં ચ પૂર્વદેવઃ સ્વયમ્પ્રભુઃ ॥ ૭॥

ભૂતં ભવ્યં ભવિષ્યચ્ચ પૂર્વમેતદકલ્પયત્ ।
ઉભે સન્ધ્યે દિશઃ ખં ચ નિયમં ચ જનાર્દનઃ ॥ ૮॥

ઋષીંશ્ચૈવ હિ ગોવિન્દસ્તપશ્ચૈવાનુકલ્પયત્ ।
સ્રષ્ટારં જગતશ્ચાપિ મહાત્મા પ્રભુરવ્યયઃ ॥ ૯॥

અગ્રજં સર્વભૂતાનાં સઙ્કર્ષણમકલ્પયત્ ।
શેષં ચાકલ્પયદ્દેવમનન્તમિતિ યં વિદુઃ ॥ ૧૦॥

યો ધારયતિ ભૂતાનિ ધરાં ચેમાં સપર્વતામ્ ।

ધ્યાનયોગેન વિપ્રાશ્ચ તં વદન્તિ મહૌજસમ્ ॥ ૧૧॥

કર્ણસ્રોતોદ્ભવં ચાપિ મધું નામ મહાસુરમ્ ।
તમુગ્રમુગ્રકર્માણમુગ્રાં બુદ્ધિં સમાસ્થિતમ્ ।
બ્રહ્મણોઽપચિતિં કુર્વઞ્જઘાન પુરુષોત્તમઃ ॥ ૧૨॥

તસ્ય તાત વધાદેવ દેવદાનવમાનવાઃ ।
મધુસૂદનમિત્યાહુરૃષયશ્ચ જનાર્દનમ્ ।
વરાહશ્ચૈવ સિંહશ્ચ ત્રિવિક્રમગતિઃ પ્રભુઃ ॥ ૧૩॥

એષ માતા પિતા ચૈવ સર્વેષાં પ્રાણિનાં હરિઃ ।
પરં હિ પુણ્ડરીકાક્ષાન્ન ભૂતં ન ભવિષ્યતિ ॥ ૧૪॥

મુખતોઽસૃજદ્બ્રાહ્મણાન્બાહુભ્યાં ક્ષત્રિયાંસ્તથા ।
વૈશ્યાંશ્ચાપ્યૂરુતો રાજઞ્શૂદ્રાન્પદ્ભ્યાં તથૈવ ચ ।
તપસા નિયતો દેવો નિધાનં સર્વદેહિનામ્ ॥ ૧૫॥

બ્રહ્મભૂતમમાવાસ્યાં પૌર્ણમાસ્યાં તથૈવ ચ ।
યોગભૂતં પરિચરન્કેશવં મહદાપ્નુયાત્ ॥ ૧૬॥

કેશવઃ પરમં તેજઃ સર્વલોકપિતામહઃ ।
એવમાહુર્હૃષીકેશં મુનયો વૈ નરાધિપ ॥ ૧૭॥

એવમેનં વિજાનીહિ આચાર્યં પિતરં ગુરુમ્ ।
કૃષ્ણો યસ્ય પ્રસીદેત લોકાસ્તેનાક્ષયા જિતાઃ ॥ ૧૮॥

યશ્ચૈવૈનં ભયસ્થાને કેશવં શરણં વ્રજેત્ ।
સદા નરઃ પઠંશ્ચેદં સ્વસ્તિમાન્સ સુખી ભવેત્ ॥ ૧૯॥

યે ચ કૃષ્ણં પ્રપદ્યન્તે તે ન મુહ્યન્તિ માનવાઃ ।
ભયે મહતિ યે મગ્નાઃ પાતિ નિત્યં જનાર્દનઃ ॥ ૨૦॥

ઇતિ મહાભારતે ભીષ્મપર્વણિ ૬૩ અધ્યાયાન્તર્ગતં
ભીષ્મકૃતં વિષ્ણુસ્તોત્રં સમ્પૂર્ણમ્ ।

મહાભારત । ભીષ્મપર્વ । અધ્યાય ૬૩/૨-૨૦॥

mahAbhArata . bhIShmaparva . adhyAya 63/2-20..

Proofread by PSA Easwaran

*Bhishmakritam Vishnu Stotram*
pdf was typeset on November 2, 2025

Please send corrections to *sanskrit@cheerful.com*